Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 1 | ISSN : 2581- 6306

# भक्तिरसविमर्श:

**राजश्री चट्टोपाध्याय**

**सहकारी अध्यापिका, संस्कृतविभाग:, गुरुदासकलेज:, पश्चिमवङ्ग: ।**

सारांश:- अथ कोऽयं रस:, कथमास्वाद्य: इत्यपि मीमांसा आलङ्कारिकै: बहुधा कृता। लोके सर्वस्य मनुष्यस्य तत्तद्भावास्वादनयोऽयं कश्चन संस्कारो भवत्येव। स च लौकिकविषयै: आवृत्त:, बहि: न प्रकाशते। स एव संस्कार: आलङ्कारिकै: वासना शब्देन गृहीत:। काव्ये नाटके वा श्रुतौ दृष्टे सामाजिक: तत्तत्पात्रगताभिनयादिभि: साधारणीकरणं भजते। तत: आवरणभङ्गेन लौकिकवासनायां निवृत्ते अलौकिकसंस्कार: प्रकाशितो भवति। यथा शरावादिना पिहित: दीप:, तन्निवृत्तौ सन्निहितान् पदार्थान् प्रकाशयति, स्वयं च प्रकाशते तथा भग्नावरणा चित्रसप्रकाशिका भवति। तेषु च भक्तिरस: भिन्न: देवादिविषयसम्बन्ध:। अत: मया भक्तिरसविमर्श: इति शीर्षोकोपेत: लेख: वितन्यते।

विशेषशब्दा:- रस:, आलम्बनविभावा: ,विभाव:, उद्दीपनविभाव:,अनुभाव:, सात्त्विकभावा: , व्याभिचारिभाव: , स्थायिभाव: , भक्ते: रसत्वम्, भक्तिरसस्य प्रवर्तका: आचार्या:, भक्तिरसस्थापनम्, भक्तिलक्षणम् इत्यादय:।

**भूमिका**- काव्यशास्त्रे रससम्प्रदायस्य प्रारम्भो भरतरससूत्रेण मन्यते। परवर्तिभि: काव्याचार्यै: रसविवेचनं रससूत्रमाधारिकृत्य कृतम्। साहित्ये रसशब्दस्य प्रयोगो विभिन्नार्थेषु जात:। वेदेष्वपि भिन्नार्थेषु 'रस' शब्द : प्रयुक्त:। यथा - **तं गोभिवर्षयणं रसं मदाय देववीतये सुतं भराय सं सृज।।**[1] ऋग्वेदऋचायां सोमरससन्दर्भे रसो प्रयुक्त:। उपनिषदि रस: परब्रह्म प्रोक्त:। यथा **रसो वै स:**[2]। सन्दर्भेऽस्मिन् रस: परब्रह्म। तत् प्राप्य जीव: आनन्दमनुभवति। आचार्ययास्केन निरुक्ते 'अश्विन' इति शब्द निर्वचने वर्णितम् - **यदव्यश्नुधाते सर्व रसेनान्ये ज्योतिषान्य:**[3]।

**रस: स्वादे जले वीर्ये शृङ्गारादौ विषे द्रव्ये।**
**बाले रागे गृहे धातौ तिक्तादौ पारदेऽपि च**
**प्रेम्णि भावे ह्यात्मनि च सुपेये स्वरसे सुखे।।**[4]

रस्यते आस्वाद्यते इति रस:। रसशब्दस्य बहव: अर्था: निघण्टुषु दृश्यन्ते। तथाहि हेमकोशग्रन्थे रसस्यास्य अष्टादशार्था: प्रस्तुता:। एतेषु अर्थेषु तिक्तादिरस:, जलम् इत्यादीनि साक्षात् रसनेन्द्रियेण आस्वाद्यानि भवन्ति। आत्मा, प्रेम इति द्वयं मनसा आस्वाद्यम्। मन: अपि इन्द्रियमेव। इन्द्रियास्वाद्यत्वं रसस्य प्रथमं लक्षणम्। किन्तु एतद् लौकिकविषयक रसलक्षणम्। परमात्मा पुन: न इन्द्रियलभ्य:। आदौ उपनिषत्सु रसशब्द: आत्मपर्यायतया प्रयुक्त:। रसो वै स:। रसं हि एवायं लब्धानन्दी भवतीति तैत्तीरीयोपनिषदि उक्तम्। अतो रस: इत्येव आनन्दसाधनम्। आनन्द: एव ब्रह्म। सोऽपि आनन्द: लौकिकानन्दात् अर्बुदाधिकगुणिक: अनन्तश्च।

सैषानन्दस्य मीमांसा भवति। युवा स्यात्साधुयुवाध्यायक:। आशिष्ठो दृढिष्ठो बलिष्ठ:। तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुषानन्द:, ते ये शतं प्रजापतेरानन्दा:।

श्रोत्रियस्य चाकामहतस्य। ते ये शतं मनुष्यगन्धर्वाणामानन्दा:, श्रोत्रियस्य चाकामहतस्य। ते ये शतं पितृणां चिरलोकलोकानामानन्दा:। स एक: कर्म देवानाम्, देवानां ये कर्मणा देवानपियन्ति, श्रोत्रियस्य चाकामरूतस्य। एतत्कर्मदेवानामानन्दा:। स एको देवानामानन्द:। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवानामानन्दा:। स एक इन्द्रस्यानन्द:।

एवं ब्रह्मानन्दस्य तुल्यरूपम् आनन्दं जनयतीति शृङ्गारादि रसोऽपि आलङ्कारिकै रसशब्देन व्यवहृत:। ब्रह्मानन्द: सब्रह्मचारी रसानन्द: इति आलङ्कारिका: रसानन्दम् आमनन्ति। स्थायीभाव प्राप्त: आनन्दो रस: इति आनन्दप्राप्तस्थायीभावो वा रस: इति विशेषणविशेष्यभावविपर्ययेण मतभेदोऽपि वर्तते। तथापि आनन्द: एव रस: इति आलङ्कारिकाणां सिद्धान्त:। ब्रह्मानन्द: अलौकिककारणजन्यत्वात् अलौकिक: रसानन्दस्तु लौकिकवस्तुविषयकलौकिक:

[1]. ऋग्वेद:-नवममण्डले षष्टमसुक्त:

[2]. तैतरीयोपनिषदि- 2.7.

[3]. निरुक्तं 12.1

[4]. विक्रमोर्वशीयम् -पृ - 174

इति तेषां मतम्। किन्तु लौकिकस्यालौकिकस्य रसस्य च आनन्दाभिन्नत्वं सिद्धमेव। द्वयोः तुल्यलक्षणत्वं भेदश्च सप्रमाणं पूर्वालङ्कारिकमतसङ्ग्रहपूर्वकं जगन्नाथः संक्षेपेण एवमुक्तवान् –

वस्तुतस्तुवक्ष्यमाणश्रुतिस्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणाचिदेव रसः। सर्वथैव चास्या विशिष्टात्मनो विशेषणं विशेष्यं वा चिदंशमादाय नित्यत्वं स्वप्रकाशत्वं च सिद्धम्। रत्याद्यंशमादाय त्वनित्यत्वमितरभास्यत्वं च। चर्वणा चास्य चिद्गतावरणभङ्गलिङ्गम् एव प्रागुक्ता, तदाकारान्तः करणवृत्तिर्वा। इयं च परंब्रह्मास्वादात्समाधेर्विलक्षणा, विभावादिविषयसंवलितचिदानन्दालम्बनत्वात्। भाव्या च काव्यव्यापारमात्रात्। अथास्यां सुखांशभाने किं मानमिति चेत्समाधावपि तद्भाने किं मानमिति पर्यनुयोगस्य तुल्यत्वात्, सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम्। शब्दोऽस्ति तत्र मानमिति चेत्। अस्त्यत्रापि रसो वैः रसं ह्ययं लब्ध्वानन्दीभवति इत्यादिश्रुतिः सकलसहृदयप्रत्यक्षं चेति प्रमाणद्वयम्। येयं द्वितीयपक्षे तदाकारचित्तवृत्यात्मिका रसचर्वणा उपन्यस्ता, सा शब्दव्यापारभाव्यत्वाच्छाब्दी। अपरोक्षसुखालम्बनत्वाच्चापरोक्षात्मिका। तत्त्वं वाक्यजबुद्धि तत्। इत्याहुराभिनवगुप्ताचार्यपादाः।

❖ **रसनिष्पत्तिः-** लोके कस्यापि कार्यस्य सिद्धये त्रीणि अपेक्षितानि तत्त्वानि भवन्ति। कारणं, कार्यं, सहकारी एवं रसविषयेऽपि विभावः अनुभावः सञ्चारीति त्रयम् अपेक्षते। अतः विभावः-कारणम्, अनुभावः – कार्यम्, सहकारी –सञ्चारी इति व्यवह्रियन्ते। तदुक्तं काव्यप्रकाशे–

**कारणान्यथकार्याणि सहकारीणि यानि च।**
**रत्यादेः स्थायिनो लोके तानिचेन्नाट्यकाव्ययोः॥**
**विभावाअनुभावास्तत् कथ्यन्ते व्यभिचारिणः।**
**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥**[5]

विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः इति भरतसूत्रमाधारीकृत्यैव सर्वोऽपि रसासिद्धान्तः प्रवर्तते।

❖ **विभावादयः** – आचार्यधनञ्जयमतानुसारे रूपके प्रधानतत्त्वत्रयेन वस्तु नेता-रसेषु रसः अन्यतमः। स च विभाव-अनुभाव-व्याभिचारीभावैः चर्व्यमाणः रत्यादिस्थायीभावः एव रसः इति व्यपदिश्यते।

एते विभावादयः के? इत्यस्यां जिज्ञासायां काव्यप्रकाशकारेण मम्मटेन काव्यप्रकाशे चतुर्थोल्लासे उक्तं यत् –

**करणान्यथ कार्याणि सहकारीणि यानि च**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।।**[6]

अर्थात् लोकदृष्ट्या रत्यादिः चित्तवृत्तिं प्रति यत् कारणम्, यत् कार्यम्, यच्च सहकारिकारणं तानि सर्वाण्येव काव्ये विभावादिशब्देन व्यपदिश्यते।

- **विभावः**– विभावो नाम विज्ञातार्थः। विभावः कारणं निमित्तं हेतुरिति पर्यायाः। विभाव्यते आविष्क्रियते रत्यादिरिति विभावः। उक्तञ्च दशरूपककारेण –

**ज्ञायमानतया तत्र विभावो भावपोषकृत्।**
**आलम्बनोद्दीपनत्वप्रभेदेन स च द्विधा।।**[7]

सामाजिकं रसास्वादेः विशेषेण भवयन्ति ते विभावाः इति व्यवहारः। लोके यत् कारणं कथ्यते तत् काव्ये वर्ण्यते चेत् विभावपदेन व्यपदिश्यते। विभावः द्विविधः आलम्वनम् उद्दिपनञ्चेति।

- **आलम्बनविभावाः –** यमालम्ब्य रत्यादिराविर्भवति तदालम्वर्नाविभावः। यथा शकुन्तलामालम्ब्य दुष्यन्तनिष्ठां रतिं प्रति शकुन्तला आलम्बनविभावः।

दुष्यन्तमालम्ब्य शकुन्तलनिष्ठां रतिं प्रति दुष्यन्त आलम्बनविभावः।

- **उद्दीपनविभावः –** येन आविर्भूतस्य रत्यादेरूद्दीपनं भवति तदुद्दीपनविभावः। यथा – शकुन्तलामालम्ब्य दुष्यन्तनिष्ठां रतिं दुष्यन्तमालम्ब्य शकुन्तलनिष्ठां रतिं वा उद्दीपयतीति कारणात् – चन्द्रिकाभ्रमरझङ्कारप्रभृतयः उद्दीपनविभावाः इति।
- **अनुभावः-** अनुभाव्यते प्रतिविषयिक्रियते रत्यादि येन कार्यरूपेणिति अनुभावः। आचार्यः धनञ्जयमतानुसारम् –

**अनुभावो विकारस्तु भावसंसुचनात्मकः।**[8]

स्थायीभावम् अनुभावयन्ते सहृदयं प्रति नयन्ति ये ते अनुभावाः। अनुभावाः अभिनये काव्ये साक्षात् अनुभूयन्तेति उत्पाद्यमानस्थायीभावम् अनुसृत्य तिष्ठन्तीति अनुभावाः। आचार्यभरतेन उक्तम् –

**वागङ्गाभिनयेनेह यतोस्तर्थोऽनुभाव्यते।**
**वागङ्गोपाङ्गसंयुक्तस्तनुभावस्ततः रमतः।।**[9]

---

[5]. काव्यप्रकाशः– 4/27-28

[6]. का. प्र– 4/27

[7]. द.रू – 4/2

[8]. द.रु –4/6

- **सात्त्विकभावा:** – आचार्यधनञ्जयेन सात्त्विकभावविषये सुनिपुणतया उपस्थापयति –

**पृथग्भावा भवन्त्यन्येऽनुभावत्वेऽपि सात्त्विका:।**

**सत्वादेव समुत्पत्तेस्तच्च तद्भावभावनम्।।**[10]

सत्वेन उत्पन्न: सात्त्विका: भावा: अनुभूयमानत्वात् अनुभावा इति। सात्विकभावानां संख्या अष्टौ।

- **व्याभिचारिभाव: –** विविधमाभिमुख्येन रसेषु चरन्तीति व्यभिचारिण:। एते रत्यादिस्थायीभावेषु बुदबुदवत् कदाचित् प्रादुर्भूता: भवन्ति कदाचिच्च तिरोभूता: मम्मटाचार्याणां लक्षणानुसारेण लोके रत्यादे: स्थायिन: यानि सहकारिणी भवन्ति तानि नाट्यकाव्ययो: निर्दिष्टानि चेत् व्याभिचारिभावपदेन उच्यते। सञ्चारयन्ति भावस्य गतिम् इति सञ्चारि। तदुक्तं दशरूपककारेण –

**विशेषादाभिमुख्येन चरन्तो व्याभिचारिण:।**

**स्थायिन्युन्मग्ननिर्मग्ना: कल्लोला इव वारिधौ।।**[11]

अर्थात् स्थिरतया वर्तमाने रत्यादौ निर्वेदादय: प्रादुर्भावतिरोभावाभ्यां विशेषेण आभिमुख्येन चरणात् व्याभिचारिण: इति कथ्यन्ते। तथा च साहित्यदर्पणे उक्तम् –

**विशेषादाभिमुख्येन चरणात् व्याभिचारिण:।**

**स्थायिन्युन्मग्ननिर्मग्ना: स्त्रयस्त्रिंशत् च तद्विदा:।।**[12]

विभावादिनां संख्या त्रयस्त्रिंशत्, अस्मिन् विषये आचार्यमम्मट: काव्यप्रकाशग्रन्थे सुनिपुणतया आलोचयति।

एतेषां विभावानुभाव्यभिचारिभावानां मिथ: संयोगे मिलने वा स्थायिभाव: रसरूपेण परिणतो भवति। विभाव: रसमुत्पादयति, अनुभाव: रसं प्रतीतिगम्यं करोति, अत: एतेषां त्रयाणां संयोगात् रस: उत्पद्यते।

- **स्थायभाव:** – स्थायी नाम चिरम् इति। चित्ते चिरं वर्तमानत्वात् रत्यादिस्थायीभाव: इत्युच्यते। आचार्यविश्वनाथेन साहित्यदर्पणग्रन्थे स्थायीभावविषये स्पष्टीकरोति –

**अविरूद्धा विरूद्धा वा यं तिरोधातुमक्षमा:।**

**आस्वादं कुरकन्दोऽसौ भाव स्थायीति संमत:।।**[13]

भरतमतानुसारेण रसादीनां संख्या अष्टौ भवति। तदानुसारं स्थायीभावानां संख्या अष्टमिता अस्ति। तदाधारेण च अष्टौ रसा: स्वीकृता:। आचार्यविश्वनाथस्य मतानुसारे एक: विशिष्ट: स्थायीभाव: विशिष्टरूपेण परिणमते।

**रतिहासश्च शोकश्च क्रोधोत्साहमौ भयं तथा।**

**जुगुप्सा विस्मयत्तमष्टौ प्रोक्ता: शामोऽपि।।**[14]

नवसंख्यका: स्थायीभावा: यथा – रति:, हास:, शोक:, क्रोध:, उत्साह:, भय:, जुगुप्सा, विस्मय:, निर्वेद: इति।

❖ **रसभेदा:**– रससंख्याविषये आलंकारिकाणां मतभेदा: दरीदृश्यन्ते तत्र भरतमहोदयेन अष्टावेव स्वीकृता: अन्ये केचन् नव केचन दश रसान् स्वीकुर्वन्ति। दशरुपककारमते अष्टावेव रसा: इति प्रदर्शितम्। तत्र शृङ्गार-वीर-बीभत्स-रौद्राणां मुख्यत्वम् एभ्यो यथाक्रममुत्पन्नां हास्यादभूतभयानककरूणानां गौणत्वम्। प्रधानरसेषु चतस्रो मानसिकवृत्तय:। या प्रधानरसोत्पन्नगौणरसेषु तिष्ठन्ति। एवं प्रकारेण मुख्यत्वं गौणत्वम् इति द्विधाऽपि कृतम्।

**भरतेन उक्तम् –**

**शृङ्गारहास्यकरुणरौद्रद्रवीरभयानका:।**

**वीभत्सोऽदभूत इत्यष्टौ रसा नाट्ये इति स्मृता:।।**[15]

---

9. ना.शा – 7.5
10. द.रू – 4.4
11. द.रू – 4/7
12. सा.द – 3/140
13. सा.द – 3/178
14. सा.द – 3/175
15. नाट्यशास्त्रम् – 6/15

**रसभेदनिरूपणचक्रम्**

| क्र.सं | रस: | स्थायीभाव: | वर्ण: | देवता |
|---|---|---|---|---|
| 1. | शृङ्गार: | रति: | श्याम: | विष्णु: |
| 2. | हास्य: | हास: | शुक्ल: | प्रमथ: |
| 3. | करुण: | शोक: | कपोत: | यम: |
| 4. | रौद्र: | क्रोध: | रक्त: | रुद्र: |
| 5. | वीर: | उत्साह: | सुवर्णवत् | महेन्द्र: |
| 6. | भयानक: | भय: | कृष्ण: | यम: |
| 7. | बीभत्स: | जुगुप्सा | नील: | महाकाल: |
| 8. | अद्भुत: | विस्मय: | पीत: | गन्धर्व: |
| 9. | शान्त: | शम: | कुन्दपुष्पवत् | श्रीनारायण: |

❖ **भक्ते: रसत्वम्**

मम्मटभट्ट: काव्यप्रकाशे देवादिविषयिणीरतिं भावेषु अन्तर्भावयति। रति: देवादिविषया व्यभिचारी तथाञ्जित:, भाव: प्रोक्त: इति। रूपगोस्वामिप्रभृतय: भक्तिरेव मुख्यरस:, इतरे गौणा: इति मम्मटमतं निराकृतवन्त:। भक्ते: नाम वेदेषु न दृश्यते इत्यपि वाद: दृश्यते। कृष्णविहारिमिश्रै: "संस्कृतकाव्यशास्त्रे भक्तिरसविवेचनम्" इति ग्रन्थे भक्ते: वेदेषु दर्शनं पुराणेतिहासयो: तस्या: एव प्रामाण्यं विशेषत: श्रीमद्भागवतस्यैव भक्तिशास्त्रसर्वस्वत्वं विस्तरेण निरूपितम्। तत्रैव बहूनि प्रमाणानि भक्ते: स्थापकानि दर्शितानीति तै: उक्तं तद् उदाह्रियते।

भज्यते सेव्यते अनया इति भक्ति: इत्यत्र करणव्युत्पत्त्या भक्तिशब्देन साधनं गृह्यते। तदुक्तं भक्तिरसायने श्रीमधूसूदनस्वरस्वतीपदै:-

**भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वत:।**
**ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्।।**[16]
**अकाम: सर्वकामो मोक्षकाम: उदारधी:।**
**तीव्रेण भक्तियोगेन यजेत पुरुषं परम्।**
**केचित् केवलया भक्त्या वासुदेवपरायणा:।**
**अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्कर:।**[17]

भज देवायामित्यस्मद्धातो: क्तिन् प्रत्यये भक्तिशब्दोऽयं निष्पद्यते।[18] भक्तिशब्दस्य शास्त्रेषु नैके अर्था: विद्यन्ते। परन्तु काव्यशास्त्रे मुख्यरुपेण सेवा ईश्वरप्रीति:, प्रभो: गुणकीर्तनम्, ईश्वरस्य सेवा, शरणागति:, ईश्वरनिकटे आत्मनिवेदनं दैन्यभावप्रकटनं तृणादपि आत्मानं तुच्छ इति चिन्तनं भक्तिरसान्तर्गतं भवति। अत: भक्तिशब्दंकथनेन प्रभो: समीपे सम्पूर्णरूपेण समर्पणता जायते।

श्री भगवान् रसस्याऽधारभूतो रसमयो रसस्वरूपश्चास्ति इति रसवादिनां स्वीकृति:। तस्य च रसत्वं मन्त्रब्राह्मणात्मकवेदेषु स्पष्टं लक्ष्यते इति तावत् प्रथमाध्यायेऽपि प्रतिपादितम्। आर्तिहेतुकी, जिज्ञासामयी, कामनामयी, ज्ञानमयी चापि भक्तिर्भगवन्तं प्रति क्रियते। परन्तु रसरूपिणी भक्तिस्तु रागमयमेव भवति। सा यदा सम्बन्धरहिताऽस्ति तदा शान्तभक्तिरस: सम्बन्धसहिता तत्तत्सम्बन्धमयीति कथ्यते। वेदेषु यद्यपि सहेतुकी भक्तिराधिक्येन दृश्यते परन्तु या भक्तिर्भक्तिरसाचार्यो रसरूपतया प्रतिपादिता सापि वेदेषु वर्तते एव। यत्र सांसारिका: कर्माणि परित्यज्यार्थाल्लोकनिन्दस्तुती विहाय भगवद्भजनमेवप्रधानं दृश्यते तत्र या भक्ति: सा शान्तिमयी शान्तभक्तिरसो वा।

वेदस्य शब्दकोषो निघण्टु: प्रसिद्ध: एव। तत्र निघण्टौ रसशब्द: वारत्रयं भिन्नेभिन्नेऽर्थे पठित:। प्रथमाध्याये एकोत्तरशतोधिकनामसु, द्वितीयेऽध्यायेऽष्टाविंशतिनामसु, तृतीयेऽध्याये चतुश्चत्वारिंशदर्चानामसु च पठित:। तस्माद्वैदिककोशानुसारेण रसशब्दो जलवाचकोऽन्नवाचकोऽर्चावाचकश्च

---

[16]. श्रीमद्भगवद्गीतायाम्, 18.55

[17]. श्रीमद्भागवते 2.3.10

[18]. भज इत्येष वै धातु: सेवायां परिकीर्तित:।
तस्मात् सेवा बुधै: प्रोक्ता भक्ति: साधनभूयसी। - गारुडेभक्तिविवरणम्-231
भज्यते सेव्यते पदार्थेन ( अभिधेयेन) प्रसिद्धतयोत्प्रैक्ष्यते इति भक्तिर्धर्म (सम्बन्ध: ) - ध्वन्यालोक:-

भवति। साधितं हि देवराजयज्वना तस्य टीकायाम् **रसति शब्दार्थः पचाद्यच् (3-1-134) रसति हि तन्मेघपर्वतादिभ्यः पतत्। अथवा रसास्वादने पुंसिसंज्ञायां घः (2-3-119) रस्यते आस्वाद्यते जिह्वया लिह्यते इति रसः। यद्वा रसोऽपां गुणः गुणगुणिनोरमेवोपचारेणाख्यायते। यद्वा सतिरर्चतिकर्मा (3-14) पचाद्यच् अर्च्यते देवातात्वात् अर्च्यतेऽनेन देवता इति वा। आत्वा विशन्विन्दवः (ऋ.सं.6-6-19-2) इति नियमः। अर्चा हि भक्तेः मुख्यमङ्गम्। नारदभक्तिसूत्रग्रन्थेऽपि** पूजादिष्वनुराग इति पाराशर्यः इति सूत्रेण पूजार्थे अर्चार्थे वा भक्तिशब्दस्य सामर्थ्यं ज्ञायते। वेदेषु च रसशब्दोऽर्चावाचको अर्थात् भक्तिवाचको गृह्यते। एवं यदि रसशब्दः एव तत्र भक्तिवाचकस्तर्हि कथं वेदेषु भक्तेरसत्वस्यानुपलब्धिः **स्यात्। वस्तुतस्तु निश्चितरूपेण वेदा एव भक्तिरसस्य मूलभूताः।**

- **भक्तिरसस्य प्रवर्तकाः आचार्याः**

भक्तिसम्प्रदाये बहवः भेदाः वर्तन्ते। तेषु मधुरभक्तिवादिनः गौडाः, तस्य सम्प्रदायस्य प्रवर्तकः चैतन्यमहाप्रभुः, किन्तु भक्तिरसविषये रसवादिनौ द्वौ आलङ्कारिकौ प्रसिद्धौ। मधुसूदनसरस्वती, रूपगोस्वामी च। मधुसूदनसरस्वती भगवद्भक्तिरसायनम्, उज्ज्वलनीलमणिं च भक्तिरसनिरूपकं ग्रन्थद्वयं रचयामास। तयोः भगवद्भक्तिरसायनं प्रचारविषये वर्तते। भगवद्भक्तिरसायने त्रयः उल्लासाः द्विशतंश्लोकाश्च वर्तन्ते।

रूपगोस्वामिनः भक्तिरसामृतसिन्धुः गुणेन **प्रामणेन** च बृहत्तरः। तत्र पूर्वविभागः, दक्षिणविभागः, पश्चिमविभागः, उत्तरविभागश्चेति चत्वारो विभागाः वर्तन्ते। पूर्वविभागे प्रतिविभागं पुनः अवान्तरविभागाः लहरीनाम्ना विभागाः वर्तन्ते। पूर्वविभागे चतस्रः लहर्यः वर्तन्ते। प्रथमलहर्याम् उत्तमभक्तिलक्षणं, शुद्धभक्तेः गुणाः, पापस्य वैविध्यं, तन्मोचनमिति विषयाः प्रतिपादिताः। द्वितीयायां साधनलहर्यां साधनभक्तिः निरूपिता। भक्तेः साधनानि तीर्थयात्रासेवनं, स्तोत्रपठनादीनि तत्र निरूपितानि। तृतीयलहर्यां भावरूपाभक्तिः उदाहृताः। चतुर्थलहर्यां प्रेमभक्तिः उदाहृता। दक्षिणविभागे पञ्चलहर्यः। पञ्चसु अपि भक्तिरससामग्री विशेषाः विभावानुभावादयः वर्णिताः। पश्चिमविभागे शुद्धाभक्तिः वर्णिता। तत्रापि चतस्रः लहर्यः। शान्तभक्तिः, प्रीतभक्तिः, प्रेयोभक्तिः, वत्सलभक्तिः, मधुरभक्तिः इत्यादयो भेदाः निरूपिताः। प्रत्येकं एकैकस्यां लहर्यां निरूपिता। उत्तरविभागे गौणो भक्तिरसः।

तत्र नवसु लहरीषु गौणभक्तिः वर्णिता। प्रथमलहरीसप्तके शान्तशृङ्गारौ विहाय इतरेषां सप्तरसानां मिश्रणं भक्तिरसेन क्रमात् उदाहृतम्। अष्टमलहर्यां रसविरोधमैत्री वर्णनम्, नवमलहर्यां रसाभासः इति विभागः दृश्यते।

- **भक्तिरसस्थापनम्**

मधुसूदनसरस्वतिना काव्यप्रकाशोक्तलक्षणम् अनूद्य निराकृतम्। **द्रुतस्य भगवत् धर्मात् धारावाहिकगतां गता। सर्वेशे मनसो बुद्धिः भक्तिरित्यभिधीयते** इति भक्तेः लक्षणमुक्तम्। कान्तादिविषये लौकिकसुखेऽपि रसत्वम् अङ्गीक्रियते। अमोधस्य परमात्मनः वर्णनात्मकं तत् संयोगेन अनुभूतं सुखं कथमिति न रसः इति प्रत्याख्येयः। अतः शाश्वतिकः आनन्दः रसः इति अङ्गीकारात् भक्तिरेव मुख्योरसः। अन्ये तस्यैव अङ्गभूताः इति मधुसूदनसरस्वतिभिः सिद्धान्तितम्।

**निगमकल्पतोर्गलितं फलं, शुकमुखादमृतद्रवसंयुतम्।**
**पिबत भागवतं रसमालयं, मुहुरहो रसिका भुवि भावुकाः॥**[19]

पद्यस्यास्य तृतीयचरणे पिबत भागवतं रसमालयम् इत्यत्र भागवतरसेन भक्तिरस एव गृह्यते।

**अस्यां वै श्रूयमाणायां कृष्णो परमपूरुषे।**
**भक्तिरुत्पद्यते पुंसः शोकमहोतमोपहा॥**

भक्त्यर्थमेव भागवत्संहिताया प्रणयकथनात् अत्र प्रतिपाद्यमानस्य भागवतरसस्य भक्तिरूपता सिद्ध्यति। अत एव भक्तिरसः शृङ्गाररसाद् भिन्नतयानुभूयते रसिकैः।

भगवद्विषयिनी संयोगविप्रलम्भाद् विविधत्मिका या रतिः सा निरुपाधिका सती अलौकिकी, अत एव तत्र मुख्यरसत्वं रसो वै सः इति श्रुतैः सारस्यात्। लौकिकी रतिस्तुपाधिजन्यत्वात्तदाभासत्वम्। तेन भक्तिरसस्य तेभ्योऽतिरिक्तत्वं सिद्ध्यति।

- **भक्तिलक्षणम्-**

**अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्।**
**आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तम।।**[20]

**नारदेन सूचितं भक्तिलक्षणम्-**

**अनन्यममता विष्णौ ममता प्रेमसङ्गता।**
**भक्तिरित्युच्यते ..........................॥**[21]

---

19. भागवते- 1.1.3

20. भ. सि- 1/11

**सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम्।**

**हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते।।**[22]

**मनागेव प्ररुढायां हृदये भगवद्रतौ।**

**पुरुषार्थस्तु चत्वारस्तृणायन्ते समन्ततः।।**[23]

भक्तिः अखण्डानन्दरूपादिरसान्तरमिश्रणेन अमिश्रणेन च गौणः शुद्धः चेति भक्तिरसं प्रथमं द्विविधो भवति। मुख्यभक्तिरेव शुद्धाभक्तिः।

मुख्यभक्तिः पञ्चधा। शान्तः, प्रीतः, प्रेयान्, वत्सलः, मधुरः च।

गौणभक्तिः सप्तधा। हास्यभक्तिः, अद्भुतभक्तिः, वीरभक्तिः, करुणभक्तिः, रौद्रभक्तिः, भयानकभक्तिः, बीभत्सभक्तिश्च।

एवमाहत्य भक्तिरसः द्वादशधा भवति। किन्तु पुराणादौ शुद्धाभक्तिः एवेति पञ्चधैव व्यवहारो दृश्यते। करूणरसादावपि सुखविरोधिसुखानुभूतिः अलौकिककाव्यव्यापारमहिम्ना दृश्यते। लौकिकशोकः तु दुःखहेतुकः एव। अपि च तत्तद्रसानां वर्णाः शान्तरसस्य दैवतानि विकासविस्तारादिचित्तस्य विशेषाः विश्वनाथसिंहैराचार्यैः दर्शिताः।

- **उपसंहारः**

**तत्त्वसाक्षात्करणाह्लाविशुद्धाब्धिस्थितस्य मे।**

**सुखानि गोष्पदायन्ते ब्राह्माण्यपि जगद्गुरो।।**

**न परिलषन्ति केतिदपवर्गमपीश्वर ते।**

**सा ब्रह्मणि स्वमह्निन्यप नाथ मा भूत्।।**

इत्यादिना नानावचनैः ब्रह्मणः पारमार्थिकदृष्ट्या अनतिशयत्वेऽपि विशुद्धशक्तिसाहचर्येण चमत्कृतितारतम्यास्यानुभवः सुतरां सिद्ध्यति। भक्तिरससमुद्रस्य सविधे ब्रह्मानन्दः परमाणुतुलामपि नार्हति। सर्वेषां शुकसनकादीनां ब्रह्मविद्वरिष्ठानामत्रैकमत्यमेव नात्र काचन संशीतिः। अतो भक्तिः मुक्त्यपेक्षया सर्वथा गरीयसीति मनसि कृत्यैवेषा सदुक्तिश्चरितार्थ्यं गता विमतिः।

**परिशीलितग्रन्थसूची**


1. काव्यादर्शः, दण्डी, चौखम्बाप्रकाशन, वाराणसी, 1972
2. चरकसंहिता, कविराज श्री अत्रिदेवजी गुप्त, भार्गव पुस्तकालय, गायघाट, वनारस्
3. दण्डी, काव्यादर्शः, एस्. विश्वनाथन्, श्रीबालमनोरमा प्रेस, पुरी।
4. भरतमुनिः, नाट्यशास्त्रम्, भारतीयविद्या भवन,1985
5. भामहः, काव्यालङ्कारः, चौखम्बा संस्कृत सीरिज् अफिस्, वाराणसी, 2002
6. मम्मटः, काव्यप्रकाशः, "आज" भवन् सन्त कबीर मार्ग, वाराणसी(221001 यू.पी), जुलाई, 2016
7. श्रीमद्भागवत-महापुराणम्, गीताप्रेस् गोरख्पुर् विक्रम सं. 2010
8. श्रीमन्महाभारतम्, वेदव्यासः, गीताप्रेस् गोरख्पुर् विक्रम सं. 2010
9. श्रीमद्रामायणम्- वाल्मीकिः गीताप्रेस् गोरख्पुर् विक्रम सं. 2010
10. साहित्यदर्पणः, विद्यावाचस्पतीसाहित्याचार्यशालिग्रामशास्त्रिविरचितयविमलाव्याख्या, मोतिलाल बनारसीदास, 2009


[21].ना.सू- 11/634

[22]. ना.सू- 1/12

[23]. भ.सि - 3/3